1.5); **3** *m.* name of S'iva नमश्चण्डाय मुण्डाय अण्डायाण्डधराय च MahāBhā. xii. App. I. 28 (180); अण्डश्च बहिरण्डश्च विराड्भूतो विशेषकृत् MahāBhā. xiii. 155*(13); नमो दण्डाय चण्डाय अण्डायोत्पत्तिहेतवे VāmaP. 47.73; **4** *m.* name of a country, GaṇPā. 35.10; **5** cupola, dome नन्दीति (प्रासादः) …कार्यश्च सप्तभौमो विभूषितोऽण्डैश्च विंशत्या BṛSaṁ. 56.21; 56.22; [एत]-त्स्वर्णाण्डकान्तिप्रवरतममहामण्डपाभोगभद्रम् (हर्म्यम्) EI. ii. 121.11; यस्यात्युच्छ्रितकान्च(ञ्च)नाण्डकलसम् EI. i. 150.19; अण्डस्य द्व्यंश उत्सेधो विस्तारः सप्तभागिकः SamarāSū. 57.138; एकोनत्रिंशदण्डोऽयं प्रासादः शुभलक्षणः SamarāSū. 57.199; पादोनमात्रा ग्रीवाण्डं सपादं पदमुच्छ्रितम् SamarāSū. ii. 107.28(57); ii. 56.24 (57); **6** *m.* sword with white and long irregular spots पुलकैरण्डस्सितदीर्घानवस्थितैः Vaija. 117.162; **7** bowl of an ascetic (अण्डम्) कठिनब्रह्मकोशवीर्येष्वपि। कठिने तापसभाजने comm. on AnekāSaṁ. 2.108; **8** technical term for some mystic sound or syllable कुम्भोऽथाग्नियुतो भुजाद्रिरषडी कर्णान्विताण्डाय हुं वर्णाश्चेति विनायकस्य गदितः षड्वर्णकोऽयं मनुः IśānS'iPa. i. 16.50; **9** a kind of seed चीनानकानामण्डानि साथ रुद्राक्षसंज्ञया। ददौ SamaMā. 2.99; तिलमाषव्रीहियवा गोधूमाण्डप्रियङ्गवः VasiS. 18.105; **10** immediate envelope अण्डं मुष्के कोशेऽप्यनन्तरे Anekā.(Pa.) 2612; **11** [musk PW; pw; nt. (E. 897 P.)]; [a part of a *stūpa.* nt.]; [Most of the kośas give the meanings (1) egg and (2) testicle. A few correlate the difference in meaning with the difference in gender पेशी कोषो द्विहीनेऽण्डम् AmaK. 1062; मुष्के खगादिकोशेऽण्डम् AnekāSa. 712; मुष्कमण्डमपानञ्च वृषणं फलकोशकम् ParyāRaMā. 519; पेशीकोशः स्मृतोऽण्डश्च AbhidhāRaMā. 2.85; 2.308; AgniP. 362.77; पेशीकोशश्च डिम्बोऽण्डम् Vaija. 30.50; अस्त्रियो मुष्ककोशाण्डाः Vaija. 178.63; 224.2; प्राण्यङ्गकोषयोरण्डम् TrikāS'e. iii. 3.110; मुष्कोऽण्डमण्डकोशश्च वृषणो बीजपेशिका RājNi. 399.4; ParyāMu. 23.89; AnekāSaṁ. 2.108; AbhidhāCin. 611; ViśvaPra. 43.7; *m.* पुंसि पेशीकोशः स्मृतोऽण्डश्च S'abdaBhePra.(Ma.) 4.20 (comm.); अण्डः अण्डम् पक्ष्यादिप्रसवः… वृषणे नपुंसकः S'abdaBhePra.(Ma.) 4.20 (comm.); DharK. 562; AnekāK. 197; अण्डं क्लीबं विहङ्गादेः पेशीकोशेऽपरे पुनः। मुष्के त्वाहुः परेऽप्येनं पुंनपुंसकयोर्विदुः NānārthāSaṁ. i. 46.40; ParyāS'aRa. 2.70; MediK. 42.1; AnekāTi. 2.16; NānārthRaMā. 390; S'abdaRa.(Vā.) 1651; 2134; ParaNā. 2178; Anekā.(Pa.) 2612; AbhidhāMañ. 172.2; अण्डं तु खगमीनादिकोशे स्यान्मुष्कवीर्ययोः ViśvaLoK. 90.1; S'abdaRa.(Su.) 3.184; KośaKaTa. 1.4588; 1.5075; 1.5076; 2.4696; KalpaK. 43.211; अण्डं मुष्के पेश्यां नपुंसके S'abdaRaSaK. Some Liṅgānuśāsanas list अण्ड only among neuter nouns Liṅgānu.(Ha.) 51.17; Liṅgānu.(Vā.) 9.15; Liṅgānu.(Para.) (89) 3591; also TrikāS'e. iii. 5.6; KośaKaTa. 2.2570; while some others list it among both *m.* and *n.* Liṅgānu.(S'ā.) 118.15; 122.14; Liṅgānu.(He.) 80.8; 116.3; Liṅgānu.(Para.) (89) 3591; (137) 3707; एते अर्धर्चादयः शब्दाः पुंसि नपुंसके साधवो भवन्ति GaṇRa. 2.63 (99); also KośaKaTa. 2.2729; KalpaK. 339.197; अण्ड is given as the meaning of (1) मुष्क AnekāSaṁ. 2.13; AnekāTi. 2.223; Anekā.(Pa.) 3280; cf. वृषण S'abdaRaSaK. 116.3; (2) कोश Vaija. 231.16; S'abdaRa.(Vā.) 3767; पेशिकोष AbhidhāCin. 1319; पेशी DharK. 2599; डिम्ब MediK. 111.5; S'abdaRaSaK. 216.6; (3) चक्षु DharK. 378; (4) पा MediK. 108.1; (5) र NānārthaMa. 1372]

**अण्ड** (–aṇḍa) (Gr.) a grammatical primary suffix तथाअनुक्ताभ्योऽपि प्रकृतिभ्यस्त्या भवन्ति। अण्डः। जृकुसृवृङः जरण्डः। करण्डः। सरण्डः। वरण्डः JaineVyā. ii. 2.167 (119.3); कृसृभृवृतृभ्योऽण्डः SaraKaṇṭhā.(Gr.) ii. 2.116; a formant in words like *eraṇḍa* etc. [DEBRU. p. 159]

**अण्डक** (aṇḍa–ka) *m. n.* [*pakṣādigaṇa* JaineVyā. iii. 2.60 (184.11)] **1A** egg कलिलं (? कललं) चैकरात्रेण पञ्चरात्रेन[°ण] बुद्बुदम्। पक्षैकेनाण्डकः सोऽथ मासपूर्णे शिरो कुरु S'atTrayī. 445; समुद्रेणापहृतास्तेऽण्डकाः Tantrākhyā. 38.8; समर्पयाधुनाण्डानि टिट्टिभस्येति (v. l. दीयतामस्य टिट्टिभस्याण्डकानि) PañcT. 1. 127 (56) (138.5); ततो देवाज्ञया समुद्रेण सभयेन तान्यण्डानि समर्पितानि (v. l. समुद्रोऽपि … तान्यण्डकानि … समर्पयामास PañcT. i. 127 (57) (138.8 v. l. for 139.9); विनिक्षिपन्त्यः सलिलेऽण्डकानि पिपीलिका वृष्टिनिरोधमाहुः BṛSaṁ. 95.59; मासेष्वाधानादिषु गर्भस्य यथाक्रमेण जायन्ते। सप्तसु कलिला-(? कलला)ण्डकशाखास्थित्वग्रोमचेतनताः Sārā. 8.29; नागी … ततः कार्त्तिकमासे तु अण्डकानि प्रसूयते BhaviP. 69B.21 (i. 33.9); एकान्तरे दिने प्राप्ते लावी सूते तथाण्डकम् Mānaso. iv. 8.1195; iv. 11.1292; अण्डकं वा मयूराण्डकादिः AupaSūṬ. 69.5; JñātāDhaṬ. 10B.6; KathāK. 33.18; पश्य स्वर्गतरङ्गिणीपरिसरे कुन्दावदातं तया (कीर्तिहंस्या)। नुक्तं भाति विशालमण्डकमिदं शीतत्विषो मण्डलम् MahāN 6.62; पेशीकोशोऽण्डके पुनः ParaNā. 1290; **1B** egg-like cover तत्राण्डके स्थितं जिष्णोः निराबाधमभूद्बलम् MahāP. 32.63; **1C** female (unfertilised) egg पुष्टासु तासु लावीषु विवृते स्मरमन्दिरे। गर्भाशये घनीभूते व्यक्तीभूते चा(तथा)ण्डके Mānaso. iv. 8.1189; **1D** universe, cosmic egg (ब्रह्माण्ड) हिरण्यगर्भो भुवनाण्डकादिव … अभूत् … द्विजन्मनामर्थपतिः पतिस्ततः Kād. 3.13; रुरुचे विरिञ्चिनखभिन्नबृहज्जगदण्डकैकतरखण्डमिव S'iśuVa. 9.9; आधिभूतं चाधिदैवं देहचक्रं तथाण्डके S'aktiSaṁT. i. 2.49; **2** *n.* cupola शोभनैः पत्रवल्लीभिरण्डकैश्च विभूषितः। प्रासादोऽयम् MatsyaP. 269.20; अंशेनोच्छ्रितमण्डकम् (मेरोः) SamarāSū. 55.11; भागेनाण्डकमुच्छ्रितम् (कैलासस्य) SamarāSū. 55.18; 55.28; 56.25 etc.; अण्डके वर्तना कार्या कङ्कतीफलसंनिभा SamarāSū. ii. 68.4 (57) etc.; **3** *n.* a variety of *kaṅkuṣṭha* (a medicinal earth) हिमवत्पादशिखरे कङ्कुष्ठमुपजायते। तत्रैकं रक्तकालं स्यात्तदन्यदण्डकं स्मृतम् BhāvPra. vi. 8.160–161; **4A** (*m. n.*) testicle स्यादण्डं पेलमण्डकः। मुष्कोऽण्डकोषो वृषणः AbhidhāCin. 611; मुष्क आण्डाण्डकौ नरि S'abdaRa.(Su.) 3.184; वृषणोऽण्डोऽण्डकं मुष्कः PañcTaPra. 7.16; **4B** *m.* scrotum (?) (पुंश्चिह्नं शिश्नमाख्यातम्) अण्डकोशाण्डकौ समौ ParaNā. 2177; अण्डकः पेलकः पेलमस्त्रियामण्डकोषवत् KośaKaTa. 1.5074; [अण्डक is given as the meaning of कोश, कोशः कोष इवाण्डके AnekāSaṁ. 2.533; also of पीशीकोश and पेशी, अथ चाण्डके पीशीकोषः पेशीकोशौ S'abdaRa.(Su.) 4.347]

**अण्डकजृम्भित** (aṇḍaka–jṛmbhita) *n.* bursting or opening of an egg यथेदं भासुरं भाति जगदण्डकजृम्भितम् YogVā. iv. 13.17.

**अण्डकटाह** (aṇḍa–kaṭāha) *m.* rarely *n.* shell of the cosmic egg तमश्चाण्डकटाहेन समन्तात्परिवेष्टितम् ViṣṇuP. ii. 4.95; ii. 7.22; एतदण्डकटाहस्य प्रमाणं परिकीर्तितम् VāyuP. i. 50.78; तत्र भगवतः … विष्णोः … वामपादाङ्गुष्ठनखनिर्भिन्नोर्ध्वाण्डकटाहविवरेण BhāgP. v. 17.1; येनाण्डकटाहमस्फुटत् BhāgP. vii. 8.16; KūrmaP. 426.12 (1.50); AgniP. 120.12; SkandP. i(2). 39.28; BrahmP. 23.22; S'ivaP. v. 18.76 (48A. 16); BṛBrahmaS. ii. 7.129; VedāntRaMañ. 1.3 (35.10); S'ivārkaMaDī. i. 232.23 (*on* i. 1.17); YatīndraDī. 48.9.

**अण्डकटाहक** (aṇḍa–kaṭāhaka) *m.* shell of the cosmic egg कोटिरण्डकटाहकः MṛgendraT. i. 13.119.

**अण्डकटाहतस्** (aṇḍakaṭāha–tas) *adv.* on account of or from the shell of the cosmic egg लोकालोकस्तु तमसावृतोऽथाण्डकटाहतः AgniP. 119.28; ĪśānS'iPa. ii. 17.120; MānaMe. 308.8.

**अण्डकटाहभित्ति** (aṇḍakaṭāha–bhitti) *f.* wall of the shell of the cosmic egg भिन्दन्नण्डकटाहभित्तिमभितो बभ्राम वंशीध्वनिः VidaMā. 1.27.

**अण्डकटाहवर्तिन्** (aṇḍakaṭāhavart–in) *adj.* resting on the shell of the cosmic egg ते चतुर्दशभुवनात्मकाण्डकटाहवर्तिनः YatīndraDī. 75.8.

**अण्डकत्रिक** (aṇḍaka–trika) *n.* group of three eggs सुषुवे साण्डकत्रिकम् Dhūrtā. 273.

**अण्डकद्वय** (aṇḍaka–dvaya) *n.* a pair of eggs निजनीडे शुकी रम्यं प्रसूते साण्डकद्वयम् PārśvC. 7.349; SamarāSaṁ. 4.420.

**अण्डकप** (aṇḍaka–pa) *m.* protector of the cosmic egg बहिरण्डकपात् (? द्) वेधाः…तिष्ठति ParaS. 26.63.

**अण्डकपाल** (aṇḍa–kapāla) *n.* a piece or a half of the shell of the cosmic egg यान्यस्याण्डकपालस्य प्राकृतस्याभवंस्तदा। तस्माद्ब्रह्मा समुत्पन्नः VāyuP. i. 51.42; तान्येवाण्डकपालानि सर्वे मेघाः प्रकीर्तिताः MatsyaP. 125.16; BrahmāṇḍP. i. 21.20; ये ते अण्डकपाले द्वे तद्बलं परमं मतम् BrahmāṇḍP. ii. 7.289; ताभ्यां सोऽण्डकपालाभ्यां दिवं भूमिं च निर्ममे BhaviP. 40A. 12 (i. 16.42); सेयं पृथिवी पृथिव्युपलक्षितमधोऽण्डकपालमित्यर्थः ChāndoUBh. 198.6 (*on* iii. 19.2); द्यावापृथिव्यौ अण्डकपाले BṛĀraUBh. 761.14 (*on* vi. 2.2); ManuBh. i. 14.29 (*on* 1.13); सूर्यस्याण्डकपाले द्वे समानीय प्रजापतिः Hastyāyur. 17.15 (1.218); कुक्कुटाण्डकपालानि कतकम् … दापयेत् SuśruS. iv. 1.99.

**अण्डकपालतस्** (aṇḍakapāla–tas) *adv.* from the half of the shell of the cosmic egg अस्यैव किञ्चिदुपरि अधश्चाण्डकपालतः। वैकुण्ठभुवनं राजन् SkandP. ii(2). 22.38.

**अण्डकपालस्थ** (aṇḍakapāla–stha) *adj.* occupying half the shell of the (cosmic) egg शर्वश्चाण्डकपालस्थो भवश्चाम्भसि LiṅgaP. i. 70.57.

**अण्डकपालोदर** (aṇḍakapālodara) *n.* cavity of half the shell of the cosmic egg (मगधराजः) तमापतन्तम्…रुधिरस्रोतोभिः पूरयन्तमिवाण्डकपालोदरम् … लवशश्चकर्त AvantiK. 113.16.

**अण्डकमानतस्** (aṇḍakamāna–tas) *adv.* from the size or measurement of a cupola एवं श्रेष्ठोऽयमाख्यातः प्रासादोऽण्डकमानतः SamarāSū. ii. 57.14 (57)

**अण्डकमोक्षण** (aṇḍaka–mokṣaṇa) *n.* laying of eggs किमपि निरुपद्रवं